A First EPQRST Journal-www.jahnavisanskritejournal.com, Issue-17th, Vol.-V, 14.1.14

ISSN 976-8645

# डॉ. हरिरामाचार्यकृते नाचिकेतकाव्ये पात्राणां चरित्रचित्रणम्

ललितकिशोरशर्मा

*कूटशब्दाः* *शब्दार्थौ, विलक्षणां प्रतिष्ठाम्, अघटितघटना, गाधीकृत्य।*

***कस्यापि जनस्य पात्रस्य वा चरित्र-चित्रणं कर्त्तुं कविः कमपि विशेषमाचरति। कवेः असाधारणी प्रज्ञा तत्र प्रमाणभूता भवति। सः स्वयं पात्रीभूय कस्यचित् पात्रविशेषस्य भावमनुभूय चरित्रचित्रणं कुरुते। प्रबन्धेऽस्मिन् हरिरामाचार्यप्रणीतनाचिकेतकाव्ये कीदृशमस्ति पात्राणां चरित्र-चित्रणं विषयोऽयं सविस्तरेण समुपस्थाप्यते।***

शब्दार्थौ काव्यम् इति शब्दः काव्यमिति वा मते कुत्रापि काव्यशरीरे तदनुप्राणकेन केनचित् आत्मभूतेन तत्त्वेन भवितव्यमिति सर्वेषामपि अविमतं मतम्। तच्च आत्मभूतं तत्त्वं किमिति सर्वेऽपि परस्परं विप्रतिपद्यन्ते। केचित् अलङ्कारान् अन्ये रीतिं, केचन् औचित्यं, अपरे वक्रोक्तिं शिष्टाः ध्वनिं च तादृशत्वेन अङ्गीकुर्वन्ति। सतीष्वपि एतासु विप्रतिपत्तिषु तच्च ध्वनितत्त्वम् एव महीयः गरीयः प्रायः सर्वविद्वदभ्युपगतञ्च। ध्वनिश्च त्रिविधः प्रसिद्धः वस्तु–अलङ्काररसात्मना। तत्र रसरूपः ध्वनिः, काव्यसर्वस्वम् इति काव्यशास्त्रे प्रतिष्ठितः सिद्धान्तः।

अस्मिन्नेव रसध्वनौ भावादयः अपि उपलक्ष्यन्ते। कवेः कवित्वं रसभावादिव्यञ्जने एव सिध्यति इति उक्तम्। तदुक्तं ध्वनिकारैः ''**नहि कवेः इतिवृत्तनिर्वाहेण एव आत्मपदलाभः। इतिहासादेरेव तत्सिद्धेः**''[1]

''**रसादिमय एकस्मिन्कविः स्यादवधानवान्**'' इति च[2]

अतः भावस्य प्राधान्यं काव्ये सर्वतो अतिशयितम्। भावाभिव्यञ्जनेनैव कवेः क्रान्तदर्शित्वम् अपि सिध्यति। अलङ्कृतानां गुणव्यञ्जकानां ललितानाम् आडम्बरयुक्तानां शब्दार्थरचनानाम् आविष्करणे केवलपाण्डित्यमेव निमित्तम्। कवेः एव असाधारणी प्रतिभा तु समुचितभावव्यञ्जकतायामेव प्रतिष्ठिता। पात्रानुकूलं सहृदयानुकूलं परिस्थित्यनुकूलं च सः रसिकहृदयेषु सुप्तान् भावान् जागरयेत्। एतदेव

ISSN 976-8645

पाठकान् काव्यम् अभिनन्दयति प्रशंसयति आत्मसात्कारयति च। अतः कविः भावादीनाम् अभिव्यञ्जने तत्परतां वहेत्। एतदर्थं सः पात्रेष्वेव सामाजिकैः तादात्म्येन भावानार्थम् अनुकूलितेषु सम्यक् भावानाम् अभिव्यक्तिः प्रदर्शनीया। एतत्कृते कवेः परानुभूतिप्रवणता सहानुभूतिदक्षता परदुःखदुःखिता आदर्शवत् निर्मलमनस्कता च अपेक्षिता भवति। स्वयं पात्रस्य परिस्थितिं परिज्ञाय तदनु पात्रस्य स्वभावचरित्रादिकम् अनतिलङ्घ्य स्वयं पात्रीभूय तस्य भावमनुभूय तादृशभावस्य सम्यक् अभिव्यञ्जनक्षमान् चेष्टादीन् सङ्कल्प्य तादृशचेष्टादीनां समुपस्थापने पटुतरान् शब्दार्थान् प्रयुञ्जीत। एतेनैव कविः आत्मपदं लभते। परभावानुभूत्यनन्तरं तदव्यञ्जकानां क्रियाकलापानां सम्यक्कल्पने तथा कल्पितानां तेषां शब्दतः प्रकटने च कवेः प्रतिभा परीक्ष्यते। इत्थं भावाभिव्यक्तिरेव कवेः मुख्यं कृत्यं काव्यस्य च परमं प्रयोजनम्।

भावाभिव्यक्तिविषये डॉ. हरिरामाचार्यस्य नाचिकेतकाव्यस्य कवेः शब्दानुपूर्वी कामपि विलक्षणां प्रतिष्ठाम् अधितिष्ठति। प्रथमतः एतदर्थं पात्राणां स्वरूपचित्रणमेव स्फटिकमिव निर्मलं विहितमनेन कविना। अत्र यानि प्रमुखपात्राणि तेषां स्वरूपनिर्माणे चरित्रादिप्रदर्शने च या पटुता प्रतिभा च कविनानेन प्रदर्शिता तत्परिशीलनं शोधपत्रस्य अस्य विषयः।

नचिकेतसः सुमेधायाः वाजश्रवसः यमस्य स्थलानुरूपवेषभूषावर्णनं तेषां चारित्र्यवर्णनं च निपुणं कृत्वा तेषु पात्रेषु अनुकूलां भावाभिव्यक्तिं कर्तुं स्थानं निर्माति। परस्परं नचिकेतसः मात्रा पित्रा च सम्बन्धमपि भाविनं भावातिरेकं पुष्णन् इव आरम्भे एव वर्णयति। तत्र प्रथमतः पात्राणि परितःवातावरणम् आचरणं च सुष्ठु वर्णितम्। ततः वाजश्रवसः परिचयः कुलपतित्वेन कृतः। तस्य गोत्रादिकं तपस्वित्वम् उदारतां कर्मठतां गोस्वाम्यं चतुर्वेदवित्त्वं सर्वशिष्टजनमान्यत्वम् आर्षसंस्कृतेः अग्रनायकत्त्वं च उपस्थाप्य वाजश्रवसः योग्यता व्यक्तित्त्वं सामाजिकप्रतिष्ठा च दृढं स्थापिता। वाजश्रवसः परिचयोपसंहारे काव्ये अवश्यापेक्षितं तस्य गुणं वर्णयति।

**कठोरो वज्रसङ्काशः कोमलः सुमसंनिभः।**
**आहिताग्निर्दयार्द्रोऽसौ तेजो-मार्दव-सङ्गमः।।**[3]

अत्र तेजोमार्दवसङ्गमः इति विशेषणम् एकमेव वाजश्रवसः आर्षव्यक्तित्वं कोपिष्ठताञ्च अभिव्यञ्जयितुम् अलम्। एवम् भूमिकायां रचितायां वाजश्रवसः भावः अनन्तरम् उचितस्थले नितरां चेतोहारितया अभिव्यञ्जितः।

इत्थं वाजश्रवसः भावचित्रणानुगुणां स्थितिं निर्माय कविः तस्य अतिशयितं पुत्रं प्रेमान्धस्य स्वस्य धर्मातिक्रमात् अस्थाने क्रोधश्च सम्यक् अभिव्यञ्जितः। यद्यपि मूलकथायां पुत्रमोहवशात् वाजश्रवाः जरठाः गाः एव ब्राह्मणेभ्यो दत्त्वा पुष्टाः गाः पुत्रस्य क्षीरादिलाभाय जुगोपेति न वर्णितं तथापि अस्मिन् कार्ये कविना नचिकेतसो मुखेन अयं विषयः समुचितं प्रकटीकृतः। तद्यथा–

ISSN 976-8645

**किन्तु पश्यामि तातेन हृष्टाः पुष्टाश्च धेनवः।**

**रक्षिता गुप्तरूपेण पुत्रमोहेन मत्कृते।।**[4]

इत्थमेव सुमेधायाः अपि कथायां महत्त्वपूर्णा भूमिका कविना चित्रिता। यद्यपि मूलकथायां कठोपनिषदि नचिकेतसः मातुः उल्लेखः नास्ति तथापि अत्र नचिकेतसः मातृत्वेन सुमेधायाः पात्रस्य परिकल्पनं तस्याः कथायां योजनं च न्यूनतां परिहार्य कामपि कमनीयतां पुष्णाति।

अत्र सुमेधायाः पात्रत्वेन परिकल्पनं मूलकथायां विद्यमानं स्त्रीपात्रदारिद्र्यं मुष्णाति। न केवलं पात्रत्वेन अस्याः सर्जनम् अपितु कथायामपि सुमेधायाः चरित्रं तथा गुम्फितं येन विना सर्वा कथा अपूर्णा इव प्रतिभायात्। सुमेधा भारतीयसंस्कृतेः नारीस्वरूपस्य प्रतिनिधिभूता अत्र चित्रिता। सा न केवलं गृहव्यवहाराणां निर्वहणे दक्षा अपितु शास्त्रार्थकुशलस्य स्वपुत्रस्य नचिकेतसः शास्त्रसम्बन्धिनीः कर्मकाण्डविषयिणीः अध्यात्मतत्त्वपराश्च आशङ्का सरलैः शब्दैः विषयस्य सर्वमपि गाम्भीर्यं गाधीकृत्य निवारयितुं समीष्टे इति तस्याः महिमा पुरुषपात्रेभ्यः किञ्चिदपि न्यूनः अस्मिन् काव्ये कविना न प्रदर्शितः। अस्याः परिचयदानावसरे कविः शरीरसौभाग्यवर्णनं अस्याः पत्युरिव अकृत्वा सुमेधायाः पातिव्रत्यमहिम्नः अतिशयतेजस्वित्वं अप्रधर्षणीयवर्चस्त्वं सर्वलोकपूजनीयत्वं च ध्वनयतीव। सा पतिधर्मैक-निरूपणीयत्वेन कविना परिचायिता। तदुक्तम्-

**सुमेधा तस्य भार्याऽऽसीत्**

**साध्वी पतिपरायणा।**

**छायेव कायसंयुक्ता**

**स्तोत्रस्येव फलश्रुतिः।।**[5]

अत्र कायसंयुक्ता छाया इत्यनेन तस्याः अनुलङ्घितपतिधर्मत्वं सर्वदा पत्युः अनुकूलाचरणत्वं च व्यञ्जितम्। स्तोत्रस्य इव फलश्रुतिः इति विशेषणम् अनया एव सुमेधया पत्युः सफलतां च ध्वनयति। इत्थम् अत्र सुमेधायाः परिचये दाम्पत्यस्य अभूतपूर्वं सामञ्जस्यं समन्वयं च व्यक्तीकृतं कविना। अपि च अस्याः योग्यतां स्वभावम् आचारं गुणं च सम्यक् उक्तवान् एकेन एव श्लोकेन-

**विदुषी वेद-तत्त्वज्ञा**

**ऋषिका मृदुभाषिणी।**

**धात्रीवाश्रम-जीवानाम्**

**शिष्येभ्यो ममतामयी।।**[6]

ISSN 976-8645

अत्रापि ऋषिकाकथनम् अस्याः अपि तत्त्वार्थदर्शित्वम् अभिव्यनक्ति। आश्रमजीवानां धात्री इति कथनं भूतमात्रे अस्याः वात्सल्यं ध्वनयति। शिष्येभ्यो ममतामयी इति कथनं च। सुमेधायां पुत्रविषये शिष्यविषये च पक्षपातराहित्यं द्योतयति यतोहि ममता मातुः एव अपत्येषु एव विद्यमानः असाधारणगुणः।

इयं न केवलं मनसा चारित्र्येण च सर्वोत्तमा बभूव। यथा अस्याः स्वरूपयोग्यता तथा अस्याः कर्म अपि आसीत्।

**आचारसदृशप्रज्ञः प्रज्ञया सदृशागमः।**
**आगमैः सदृशारम्भः आरम्भसदृशोदयः।।**[7]

इति महाकवेः कालिदासस्य दिलीपविषयिणी उक्तिः सर्वथा सुमेधायामपि सार्थकीभवति। कविः अस्याः असाधारणीं योग्यतां कथयित्वा अस्याः प्रधानकर्म कथयति।

**गृहिणी गृहपर्याया**
**अर्चेवाश्रमपावनी।**
**केन्द्रं कुटुम्ब-वृत्तानाम्**
**कीर्ति-र्गुरुकुलस्य च।।**[8]

राष्ट्रस्य अंशद्वयं पारिवारिकं सामाजिकं च इति। अत्र पारिवारिकस्य दायित्वस्य कर्त्तव्यस्य च निर्वहणं स्त्रिया क्रियते। सामाजिकस्य अंशस्य प्रोन्नत्यै पुरुषः परिश्राम्यति। इत्थं राष्ट्रस्य उभयेषु अपि अंशेषु तारतम्यरहितेषु समापेक्षोपेक्षभावेषु स्त्रियाः पुरुषस्य च स्व-स्वक्षेत्रे पूर्णः अधिकारः सम्पूर्णं दायित्त्वञ्च भारतीयपरम्परायाम् अनुस्यूतत्त्वेन अनुष्ठीयमानं भारतीयजीवनशैल्याः कविः उपस्थापितवान्। अतएव बहून् गुणान् कीर्तयित्वा उक्तवान् ''**गृहिणी गृहपर्याया**'' इति ''**केन्द्रं कुटुम्बवृत्तानाम्**'' इति एतस्मादेव कारणात् सा आश्रमपावनी अर्चा इव गुरुकुलस्य कीर्तिः इव च वर्तते।

एवं सत्यपि अर्थात् गृहरूपस्य दीपकस्य प्राणभूता शिखा इव सा अस्ति तथापि सुमेधा शिष्याणां स्वतपश्शक्त्या अमङ्गलं परिहरन्ती मङ्गलरूपिणी विद्यते। शिष्याणां शङ्का अपाकुर्वती स्वयम् आचार्या भवति तथा यज्ञेषु कर्तव्येषु ऋषेः साहाय्यमपि करोति। इत्थं कौटुम्बिककर्तव्येषु अच्युता सती सामाजिकदायित्वेष्वपि यथायोगं करोति। तदुक्तम्-

**शिखेव गृहदीपस्य**
**चाशीः मङ्गलरूपिणी।**

ISSN 976-8645

**आर्याऽऽचार्या ऋषेर्भार्या**

**यज्ञेषु सहधर्मिणी।।**[9]

इत्थम् आगामिषु सर्गेषु घटिष्यमानासु घटनासु सुमेधायाः भावम् अभिव्यक्तिं च सम्यक् अभिव्यञ्जयितुं तत्प्रतिष्ठारूपेण प्रथमे एव सर्गे सुमेधायाः भावानुगुणं चरित्रं निबद्धम्। इत्थं चतुर्भिः श्लोकैः सुमेधा पतिपरायणा, साध्वी, मृदुभाषिणी, वेदतत्त्वज्ञा, ऋषिका, सर्वेभ्यः ममतामयी, पत्युः सधर्मिणी आचार्या, आर्या मङ्गलरूपिणी च वर्णिता। सुमेधायाः चरित्रं केन्द्रीकृत्य भावसौष्ठवं ध्वनिनिरूपणप्रसङ्गे वर्णयिष्यते।

नाचिकेतकाव्ये प्रधानं पात्रं नचिकेताः एव। तस्यैव नाम्ना अस्य काव्यस्य अपि नामकरणं कविना विहितं वर्तते। अस्मिन् काव्ये नायिका नास्ति। नायकश्च नचिकेताः ब्रह्मचारी। अयं द्विजः शान्तस्वभावः धर्मभीरुः मृदुः विरक्तः सन् धीरशान्तनायककोटौ निवेशम् अर्हति। उक्तञ्च–

**सामान्यगुणैर्भूयान्द्विजादिको धीरशान्तः स्यात्।**[10]

नचिकेतसः वर्णने कविः तस्य शरीरगतं सौन्दर्यमपि वर्णयति। नचिकेतसः परिचयः शीलवत्वेन एव कविना कारितः। शीलं नाम गुणः अघटितघटना पटुः। अत्र च नचिकेताः साधारणेन मनुष्येण अचिन्तनीयं कर्म करोति। एतदर्थं च तस्य शीलमेव शक्तिः इति बोधयितुमेव कविः शीलत्वेन तं परिचाययति। शीलविषये नीतिशतके उक्तम्–

**वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणान्**

**मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते।**

**व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते**

**यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति।।**[11]

ततश्च अस्य व्यक्तित्वं वर्णितम्। बाल्ये एवं मनुष्यस्य भावी गुणः प्रकटीभवतीति कथयति कविः। तद्यथा–

**नचिकेतास्तयोः पुत्रः शीलवान् प्रियदर्शनः।**

**एधापेक्षो यथा वह्निः स्फुलिङ्गावस्थया स्थितः।**[12]

सः मेधावी तत्त्वजिज्ञासुः ज्ञानकामः च वर्णितः। तथैव ज्ञानं प्रेप्सोः योग्यतां कथयन् यथा भगवान् जगौ–

**श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।**[13]

तथा तत्त्वजिज्ञासुः इत्यनन्तरं सः जिज्ञासुः इत्यपि उक्तः। तस्य सारल्यं बाल्यविरोधितार्किकत्वं वेदशास्त्रनिष्णाततत्वं च वर्णितम्।

कविः भारतीयसंस्कृतं यथासमयं प्रकाशयति एव नचिकेतसः वर्णनसमये इमं शिखासूत्रधर इति विशेषणं दत्तवान्। तथैव अक्षमालाधरः, ब्रह्म इव मृगचर्मधरः, शिवः इव वटुरूपधरः वामनः विष्णु इव नचिकेता देवोपमः आसीत्। तदुक्तम्-

**अक्षमालाधरो ब्रह्मा मृगचर्मधरः शिवः।**
**वटुरूपधरो विष्णुर्नचिकेताः सुरोपमः।।**[14]

इत्थं नचिकेताः विवेकी तत्त्वजिज्ञासुः सरलः धार्मिकः निष्कामः च चित्रितः। इदमपि नचिकेतसः चित्रणं भाविन्यां कथायां तस्य भावम् अभिव्यञ्जयितुं मूलभूमिरिव कार्यं करोति।

## अन्तटिप्पणी

1. ध्वन्यालोकः-तृतीय उद्योते
2. ध्वन्यालोकः-४/५
3. नाचिकेतकाव्यम्-१/३१
4. तत्रैव-४४/४७
5. तत्रैव-१/३२
6. तत्रैव-१/३३
7. रघुवंशम् १/१५
8. नाचिकेतकाव्यम्-१/३४
9. नाचिकेतकाव्यम्-१/३५
10. साहित्यदर्पणम्-३/३४
11. नीतिशतकम्-श्लोकसंख्या-१०८
12. नाचिकेतकाव्यम्-१/३६
13. श्रीमद्भगवद्गीता-४/३९
14. नाचिकेतकाव्यम्-२/४२

ISSN 976-8645

# सन्दर्भग्रन्थसूची


1. ध्वन्यालोकः-आचार्यविश्वेश्वर, ज्ञानमण्डल लिमिटेड, वाराणसी संवत्-2011।
2. रघुवंशम्-प्रो. हरि दामोदर वेलणकर, मोतीलाल बनारसीदास जवाहरनगर, दिल्ली-1974।
3. नीतिशतकम्-डॉ. राजेश्वर मिश्र, अक्षयवट प्रकाशन, बलरामपुर, इलाहाबाद-2007।
4. श्रीमद्भगवद्गीता-श्रीमत्परमहंसपरिव्राजकायार्च, चौखम्बा संस्कृत प्रतिष्ठान जवाहर नगर, दिल्ली-2008।
5. नाचिकेतकाव्यम्-आचार्य हरिराम, लिटरेरी सर्किल, जयपुर, 2008।
6. साहित्यदर्पणम्-शालिग्राम शास्त्री, मोतीलाल बनारसीदास दिल्ली-2004।